# अथ वेदव्यासमन्त्रप्रयोग:

## "ऊँ जूं स: व्यां वेदव्यासाय नम: स: जूं ऊँ" - मूलमन्त्र:।

अथास्य वेदव्यासमन्त्रस्य ब्रह्मा ऋषि:, अनुष्टुप्छन्द:, सत्यवतीसुतो देवता, व्यां बीजं, नम: शक्ति:, ऊँ कीलकं, ममाभिष्टसिद्ध्यर्थे जपे विनियोग:।

अथ ऋष्यादिन्यास: :-

ऊँ ब्रह्म ऋषये नम: - शिरसि, ऊँ अनुष्टुप्छन्दसे नम: - मुखे, ऊँ सत्यवतीसुतदेवतायै नम: - हृदि, ऊँ व्यां बींजाय नम: - गुह्ये, ऊँ नम: शक्तये नम: - पादयो:, ऊँ ऊँ कीलकाय नम: - नाभौ, ऊँ ममाभिष्टसिद्ध्यर्थे जपे विनियोगाय नम: - सर्वांगे।

अथ हृदयादिन्यास: :-

| अथ बीजं | अथ हृदयादिन्यास: | अथ करन्यास: |
|---|---|---|
| ऊँ ऊँ व्यां | हृदयाय नम: | अंगुष्ठाभ्यां नम: |
| ऊँ व्यीं | शिरसे स्वाहा | तर्जनीभ्यां नम: |
| ऊँ व्यूं | शिखायै वषट् | मध्यमाभ्यां नम: |
| ऊँ व्यैं | कवचाय हुम् | अनामिकाभ्यां नम: |
| ऊँ व्यौं | नेत्रत्रयाय वौषट् | कनिष्ठिकाभ्यां नम: |
| ऊँ व्य: | अस्त्राय फट् | करतलकरपृष्ठाभ्यां नम: |

अथ ध्यायेत् :-

व्याख्यामुद्रिकया लसत्करतलं सद्ययोगपीठस्थितं वामे जानुतले दधानमपरं हस्तेषु विद्यानिधिं।
विप्रव्रातवृतं प्रसन्नमनसं पाथोरुहांगद्युतिं पाराशर्यमतीव पुण्यचरितं व्यासं स्मरेत्सिद्धये।।

(इति ध्यात्वा मानसोपचारै: संपूजयेत्। तत: सर्वतोभद्रमण्डले धर्मादिपीठदेवता: संस्थाप्य) - "ऊँ धर्मादिपीठदेवताभ्यो नम:" - (इत्यनेन मन्त्रेण पूजयेत्)।

(तत: यंत्रं मूर्तिं वा ताम्रपात्रोपरि निधाय घृतेनाभ्यंज्य दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोध्य पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां कुर्यात्)

"ऊँ ह्रीं आं क्रों यं रं लं वं शं षं सं हं ह्रीं हंस: सोऽहं सोऽहं हंस: शिव: - यन्त्रस्य प्राणा इह प्राणा: सन्तु। ऊँ ह्रीं आं क्रों यं रं लं वं शं षं सं हं ह्रीं हंस: सोऽहं सोऽहं हंस: शिव: - यन्त्रस्य जीव इह स्थितो भवतु। सर्वेन्द्रियाणि वांग्मनश्चक्षु:श्रोत्रजिह्वाघ्राणा: इहैवागत्यासीरन् यन्त्रे सुखं चिरं च तिष्ठन्तु स्वाहा।"

(इत्यनेन प्रकारेण प्रतिष्ठां कृत्वा पुनर्ध्यात्वा मूलेनावाहनासनपाद्यार्घ्याचमनस्नानवस्त्राभूषण गन्धपुष्पान्तोपचारै: संपूज्य षट्कोणकेसरेषु आग्नेयादिचतुर्दिक्षु मध्ये दिक्षु चावरणपूजां कुर्यात्) - (तत: षडंगानि पूजयेत्)

ऊँ व्यां हृदयाय नम:, ऊँ व्यीं शिरसे स्वाहा, ऊँ व्यूं शिखायै वषट्, ऊँ व्यैं कवचाय हुम्, ऊँ व्यौं नेत्रत्रयाय वौषट्, ऊँ व्य: अस्त्राय फट्। (तत: पुष्पांजलिमादाय मूलमुच्चार्य)
" ऊँ अभीष्टसिद्धिं मे देहि शरणागतवत्सल। भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनं।।"
(इति पठित्वा पुष्पांजलिं च दत्त्वा)
"पूजितास्तर्पिता: सन्तु" (इति प्रथमावरणं ततोऽष्टदले पूज्यपूजकयोरन्तराले प्राचीं तदनुसारेण अन्या दिश: प्रकल्प्य दक्षिणावर्तेन प्राच्यादिचतुर्दिक्षु)

ऊँ शल्याय नम:, शल्यश्रीपादुकां पूजयामि तर्पयामि नम:।१।
ऊँ वैशम्पायनाय नम:, वैशम्पायनश्रीपादुकां पूजयामि तर्पयामि नम:।२।
ऊँ जैमिनये नम:, जैमिनिश्रीपादुकां पूजयामि तर्पयामि नम:।३।
ऊँ सुमन्ताय नम:, सुमन्तश्रीपादुकां पूजयामि तर्पयामि नम:।४। (तत: आग्नेयादिचतुष्कोणेषु)
ऊँ श्रीशुकाय नम:, शुकश्रीपादुकां पूजयामि तर्पयामि नम:।५।
ऊँ उग्रश्रवसे नम:, उग्रश्रव:श्रीपादुकां पूजयामि तर्पयामि नम:।६।
ऊँ समन्याय नम:, समन्यश्रीपादुकां पूजयामि तर्पयामि नम:।७।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

ॐ चिमनाय नमः, चिमनश्रीपादुकां पूजयामि तर्पयामि नमः।८।

पूजयित्वा पूर्ववत्पुष्पांजलिं दद्यात्, इति द्वितीयावरणं। ततो भूपुरे इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च पूजयित्वा पुष्पांजलिं च दद्यात्। हत्यावरणपूजां कृत्वा धूपदीपनैवेद्याचमनताम्बूलस्तवपाठ-नीराजनपुष्पांजलिप्रदक्षिणानमस्कारान्तोपचारैः संपूज्य क्षमायाचनां च कृत्वा जपं कुर्यात्) – (तत्र धूपादिषु विशेषः)

<u>धूपं</u> – वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यतां।
ॐ व्यां सांगाय सायुधाय सवाहनाय सपरिवाराय वेदव्यासाय धूपं समर्पयामि।

<u>दीपं</u> – स्वप्रकाशो महादीपःसर्वतस्तिमिरापहः। स बाह्याभ्यन्तरं ज्योतिर्दीपोऽयं प्रतिगृह्यतां।
ॐ व्यां सांगाय सायुधाय सवाहनाय सपरिवाराय वेदव्यासाय दीपं दर्शयामि।

<u>नैवेद्यं</u> – ॐ अमृतोपस्तरणमसि स्वाहा – (जलं दत्वा प्राणाहुतीन् दद्यात् ततः)
ॐ व्यां वेदव्यासाय नमः अस्त्राय फट् – (इति मन्त्रेण प्रोक्षयित्वा)
ॐ जूं सः वौषट् – (इति ७ वारं जप्त्वा अर्थमन्त्रणं च कृत्वा जलेन प्रोक्षयित्वा)
ॐ आं यं श्रौषट् – (इत्यनेन मन्त्रेण ७ वारमधोमुखवामहस्तेन तालिकां कृत्वा)
ॐ इं वं स्वाहा – (इत्यनेन मन्त्रेण धेनुमुद्रां प्रदर्शयित्वा मूलमन्त्र ७ वारं जप्त्वा-अर्थमन्त्रणं कुर्यात् ततः अर्घ्यादित्रयं दद्यात्)
ॐ अमृतपिधानमसि स्वाहा – (पुनः जलं दद्यात्)
ॐ व्यां सांगाय सायुधाय सवाहनाय सपरिवाराय वेदव्यासाय नैवेद्यं निवेदयामि।

(कृतपूजाया साद्गुण्यार्थे दक्षिणामपि दद्यात्) । हरिः ॐ तत्सत् । ब्रह्मार्पणमस्तु।

<u>अत्र ध्येयं</u> :-

अस्य पुरश्चरणमयुतजपाः। पायसान्नेन दशांशतो होमः। एवं कृते मन्त्रः सिद्धो भवति। सिद्धे च मन्त्रे मन्त्री प्रयोगान् साधयेत्। यथा –

“ जपेदष्टसहस्राणिपायसैर्होममाचरेत् । एवं सिद्धमनुर्मन्त्री कवित्वं शोभनाः प्रजाः।।
व्याख्यानशक्तिं कीर्तिं च लभते संपदां च यः। मृत्युंजयेन पुटितं यो व्यासस्य मनुं जपेत्।।
सर्वोपद्रवसंत्यक्तो लभते वांछितं फलं। मृत्युंजयस्य मन्त्रोऽयं त्रिवर्णो मृत्युनाशनः।।
जप्तोऽयं केवलो नॄणामिष्टसिद्धिं प्रयच्छति। किं पुनस्तेन पुटितो वेदव्यासमनूत्तमः।।

<u>इत्यों शम्</u>

अथ वेदव्यासपूजनयन्त्रम्.




Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM